९

साधारणस्वरः-२

प्रस्तावना

आ वैदिककालात् अद्यापि गुरुकुलेषु तथा विभिन्नेषु प्रतिष्ठानेषु गुरुशिष्यमाध्यमेन वेदपाठः प्रचलति। वेदानां पाठः गुरुपरम्परानुसारं सस्वरं क्रियते। अतः वेदे स्वरस्य स्थानं सर्वोपरि वर्तते। केवलं वेदपाठेन एव वेदे कुत्र कः स्वरः भविष्यति इति विद्वांसः ज्ञातुं न प्रभवन्ति। अतः व्याकरणेन स्वरनिर्णयस्य कौशलं सर्वैः ज्ञातव्यमेव। बहोः कालात् पूर्वमेव महर्षिः पाणिनिः निखिलस्यापि वैदिकवाङ्मयस्य स्वरनिर्णयार्थं सूत्राणि रचितवान्। तेषु सूत्रेषु च केचन विशिष्टाः प्रयोगाः पाणिनिना अनिर्दिष्टाः सन्ति। अतः परस्मिन् काले वार्तिककारेण कानिचन वार्तिकानि रचितानि। अतः अस्मिन् पाठे साधारणस्वरप्रतिपादकानि पाणिनीयसूत्राणि तथा वार्तिकानि आलोच्यन्ते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- सूत्रैः स्वरसिद्धिप्रक्रियां ज्ञास्यति।
- स्वरसम्बन्धीनि वार्तिकानि ज्ञास्यति।
- एकश्रुतिविषये ज्ञास्यति।
- सूत्रार्थस्य समन्वयं ज्ञास्यति।
- साधारणस्वरविषये सामग्रिकज्ञानं प्राप्स्यति।

९.१) उदात्तादनुदात्तस्य स्वरितः॥ (८.४.६६)

सूत्रार्थः - उदात्तात्परस्य अनुदात्तस्य स्वरितः स्यात्।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम् । अनेन सूत्रेण स्वरितस्वरः विधीयते। उदात्ताद् अनुदात्तस्य स्वरितः इति सूत्रगतपदच्छेदः। त्रिपदात्मके अस्मिन् सूत्रे उदात्ताद् इति पञ्चम्येकवचनान्तम्, अनुदात्तस्य इति षष्ठ्येकवचनान्तं, स्वरितः इति प्रथमैकवचनान्तं पदम्। स्वरितः इत्यस्य प्रथमान्तत्वाद् अस्यैव विधायकत्वम्। उदात्ताद् अनुदात्तस्य स्वरितः इति सूत्रगतपदयोजना। उदात्ताद् इत्यत्र पञ्चमीनिर्देशाद् 'तस्मादित्युत्तरस्य' इति परिभाषया उदात्ताद् उत्तरस्य इति लभ्यते। एवञ्च अस्य सूत्रस्य अर्थो भवति उदात्तात्परस्य अनुदात्तस्य स्वरितस्वरो भवति इति।

उदाहरणम्- अग्निमीळे (अ॒ग्निमी॑ळे) इति।

सूत्रार्थसमन्वयः- अग्निमीळे इत्यत्र गत्यर्थकस्य अगिधातोः 'धातोः' इति सूत्रानुसारेण अकारः उदात्तः। ततः अङ्गेर्नलोपश्च इति सूत्रेण नि-प्रत्यये, अस्य धातोः इदित्वाद् (अगि-धातोः इकारः इत्संज्ञकः) इदितो नुम् धातोः इत्यनेन नुमागमे अनुबन्धलोपे स्थितस्य नकारस्य तेनैव (अङ्गेर्नलोपश्च) सूत्रेण लोपे अग्निशब्दः निष्पद्यते। अत्र निप्रत्ययस्य नकरोत्तरः इकारः आद्युदात्तश्च इत्यनेन उदात्तः। एवम् अग्नि इत्यत्र उदात्तस्वरद्वयं वर्तते एकः धातोः अपरः प्रत्ययस्य। अत्र अगिधातोः अकारस्य उदात्तस्वरः धातुपाठे निर्दिष्टः परन्तु नि-प्रत्ययस्य इकारस्य उदात्तस्वरः सूत्रेण उपदिष्टः अतः 'सतिशिष्टस्वरो बलीयान्' (६.१.१५८) इति परिभाषासूत्रेण सतिशिष्टस्वरस्य (परं निर्दिष्टस्य स्वरस्य) बलवत्तरत्वम् इति। तेन अनुदात्तं पगमेकवर्जम् इति सूत्रेण धातोः (अगि-इत्यस्य) अकारस्य अनुदात्तस्वरः न तु प्रत्ययस्य इति। एवम् अग्नि-इत्यत्र अकारः अनुदात्तः इकारः उदात्तः इति सिध्यति। ततः विहितस्य अम्-प्रत्ययस्य अनुदात्तौ सुप्पितौ इत्यनेन अनुदात्तस्वरः। ततः अग्नि अम् इति स्थिते अमि पूर्वः इत्यनेन उदात्त-इकारस्य अनुदात्त-अकारस्य च स्थाने पूर्वरूपैकादेशे इकारे 'एकादेश उदात्तेनोदात्तः' इत्यनेन तस्य (इकारस्य) उदात्तस्वरः। ईड स्तुतौ इति धातोः लटि उत्तमपुरुषैकवचने ईळे इति रूपम्। अत्र 'द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो लकारः' इति प्रातिशाख्यवचनेन डस्य ळः। अत्र अग्निम् ईळे इति स्थिते तिङ्ङतिङः इति सूत्रेण सर्वानुदात्तस्वरः। एवमत्र उदात्तात् (इकारात्) परस्य अनुदात्तस्य (ईकारस्य) वर्तमानात् प्रकृतसूत्रेण परस्य अनुदात्तस्य स्वरितस्वरः। ईळे इत्यत्र स्वरिताद् ईकारात्परस्य ळे इत्यस्य एकारस्य अनुदात्तत्वात् 'स्वरितात् संहितायामनुदात्तानाम्' इति सूत्रेण एकारस्य एकश्रुतिस्वरः(उदात्तानुदात्तस्वरितानां तिरोधानम्) भवति। एवम् अ॒ग्निमी॑ळे इति रूपं सिध्यति।

विशेषः- ननु अत्र अग्निम् ईळे इत्यत्र उदात्तानुदात्तयोः (इकार-ईकारयोः) मध्ये मकारस्य विद्यमानत्वात् कथम् इकारात्परस्य ईकारस्य स्वरितस्वरः इति चेद् उच्यते, स्वरविधौ व्यञ्जनमविद्यमानवद् इति परिभाषया अत्र मकारस्य विद्यमानत्वेऽपि स्वरविधित्वात् तन्नास्ति इति गृह्यते तेन अत्र मकारेण व्यवधानाभावात् न स्वरितत्वबाधः इति।

प्रकृतं सूत्रम् अष्टमाध्यायस्य चतुर्थे पादे वर्तते अतः त्रिपादिस्थेन अनेन सूत्रेण यः स्वरितस्वरः विहितः सः अनुदात्तं पदमेकं वर्जम्(६.१.१५८) इति सपादसप्ताध्यायिस्थसूत्रदृष्ट्या असिद्धः। अतः ईळे इत्यत्र अनुदात्तं पदम् एकवर्जम् इति सूत्रं न प्रवर्तते। तेन उदात्तस्वरितौ उभावपि स्वरौ श्रूयेते इति शम्।

१.२) नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्॥ (८.४.६६)

सूत्रार्थः - उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्। गार्ग्यादिमते तु स्यादेव।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं निषेधविधायकं सूत्रम्। अनेन सूत्रेण स्वरितस्वरस्य निषेधो भवति। न उदात्तस्वरितोदम् अगार्ग्यकाश्यपगालवानाम् इति सूत्रगतपदच्छेदः। त्रिपदात्मके अस्मिन् सूत्रे न इति अव्ययपदम्, उदात्तस्वरितोदयम् इति प्रथमैकवचनान्तम्, अगार्ग्यकाश्यपगालवानाम् इति षष्ठीबहुवचनान्तं पदम्। उदात्तस्वरितोदयं न अगार्ग्यकाश्यपगालवानाम् इति सूत्रगतपदान्वयः। उदात्तादनुदात्तस्य स्वरितः इति सूत्राद् अनुदात्तस्य इति षष्ठ्यन्तं पदं स्वरितः इति प्रथमान्तं पदं

चानुवर्तते। उदात्तश्च स्वरितश्च उदात्तस्वरितौ उदयौ यस्माद् इति उदात्तस्वरितोदयम् इति बहुव्रीहिसमासः। उदयशब्दः परशब्देन समानार्थः इति प्रातिशाख्येषु प्रसिद्धः। उदात्तस्वरः परं यस्य तादृशस्य, स्वरितस्वरः परं यस्य तादृशस्य वा अनुदात्तस्वरस्य इत्यर्थः। न गार्ग्यकाश्यपगालवानाम् इति अगार्ग्यकाश्यपगालवानाम् इति नञ्समासः। गार्ग्य-काश्यप-गालवानाम् ऋषीणां मते तु न भवति इत्यर्थः। उदात्तादनुदात्तस्य स्वरितः इति सूत्रस्य एव अत्र निषेधः। तेन सूत्रार्थो भवति उदात्तपरः स्वरितपरः च यः अनुदात्तः, तस्य 'उदात्तादनुदात्तस्य स्वरितः' इति सूत्रेण प्राप्तः स्वरितस्वरो न भवति, गार्ग्य-काश्यप-गालवानाम् ऋषीणां मते तु भवत्येव इति।

उदाहरणम्- वोश्वाः क्वां १ भीशंवः (ऋ.५।६१।१२) इति। प्र य आ रुः इति।

सूत्रार्थसमन्वयः- अत्र क्वशब्दोत्तरं किमोऽत् इत्यनेन सूत्रेण अत्-प्रत्यये तथा क्वाति इत्यनेन किमः स्थाने क्व-इत्यादेशे क्व-इति रूपं सिध्यति। अत्-प्रत्ययस्य तकारस्य इत्संज्ञकत्वात् तित्स्वरितम् इति सूत्रेण अत्-प्रत्ययान्तस्य क्व-शब्दस्य अकारस्य स्वरितस्वरः। युष्मदः स्थाने वस्-इत्यादेशे सस्य रुत्वे अतो रोरप्लुतादप्लुते इत्यनेन रोः उत्वे आद्गुणः इति अकार-उकारयोः स्थाने गुणे ओकारे वो-इति सिध्यति। अत्र वस्-इत्यादेशः अनुदात्तं सर्वमपादादौ इत्यस्य अधिकारे भवति अतः वाकारोत्तरः अकारः अनुदात्तः। अशू-धातोः अशूप्रुषिलटिकनिखटिविशिभ्यः क्वन् इति उणादिसूत्रेण क्वन्-प्रत्यये बहुवचने प्रक्रियायाम् अश्वाः इति सिध्यति। क्वन्-प्रत्ययस्य नकारः इत् भवति अतः क्वन्प्रत्ययान्तः अश्वशब्दः ञ्नित्यादिर्नित्यम् इति सूत्रानुसारेण आद्युदात्तः भवति। ततः वो अश्वाः इति स्थिते एङः पदान्तादति इति सूत्रेण ओकार-अकारयोः स्थाने पूर्वरूपे 'एकादेश उदात्तेनोदात्तः' इति सूत्रेण वकारोत्तरः उकारः उदात्तः, 'अनुदात्तं पदमेकवर्जम्' इति सूत्रानुसारेण श्वा- इत्यत्र आकारः अनुदात्तः। अत्र वोऽश्वाः(वः अश्वाः) क्व इत्यत्र वकारोत्तरः उकारः उदात्तः, श्वोत्तरः आकारः अनुदात्तः तथा क्वोत्तरः अकारः स्वरितः इति। एवमत्र उदात्तात्परस्य अनुदात्तस्य सत्त्वाद् उदात्तादनुदात्तस्य स्वरितः इति पूर्वसूत्रेण अनुदात्तस्य स्वरितस्वरे प्राप्ते तस्य स्वरितपरत्वाद् अनेन प्रकृतसूत्रेण, पूर्वेण प्राप्तस्य स्वरितस्वरस्य निषेधः भवति। तेन यथा पूर्वम् अनुदात्तस्वरः आसीत् तथैव स्थास्यतीति।

प्र य आ रुः इत्यत्र ये इति यच्छब्दस्य प्रथमाबहुवचनं फिट्स्वरेण 'फिषोऽन्त उदात्तः' इति सूत्रेण अन्तोदात्तम्। अतेर्लिटि प्रथमाबहुवचने झिप्रत्यये आरुः इति रूपम्। अत्र परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इत्यनेन विहितः उस्-प्रत्ययः प्रत्ययस्वरेण उदात्तः। आरुः इत्यत्र आकारस्य उदात्तस्वरितपरस्य सन्नतरः इत्यनेन अनुदात्तस्वरः। एवमत्र यकारोत्तरः अकारः उदात्तः, आकारः अनुदात्तः, रुः इत्यत्र उकारः उदात्तः इति। तेन अत्र उदात्तात् परस्य अनुदात्तस्य सत्त्वाद् उदात्तादनुदात्तस्य स्वरितः इति पूर्वेण सूत्रेण अनुदात्तस्य स्वरिते प्राप्ते तस्य उदात्तपरत्वाद् अनेन प्रकृतसूत्रेण पूर्वेण प्राप्तस्य स्वरितस्वरस्य निषेधः भवति। तेन यथा पूर्वम् अनुदात्तस्वरः आसीत् तथैव स्थास्यतीति। एतेन प्र य आ रुः इति सिध्यति।

गार्ग्य-काश्यप-गालवानाम् ऋषीणां मते तु स्वरितस्य निषेधो न भवति अपि तु पूर्वसूत्रेण प्राप्तः स्वरितस्वर एव भवति इति।

विशेषः- ननु 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' तेन अत्र कथम् उदयशब्दस्य प्रयोगः तत्स्थले परशब्दस्य प्रयोगेन तु लाघवं स्यात् इति चेद् अत्र उच्यते अत्र उदयशब्दः मङ्गलार्थः इति। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च इति बृद्धिरादैच् इति सूत्रभाष्ये पतञ्जलिना उक्तम्। अत्र उदयशब्दप्रयोगेन पाणिनिना मङ्गलं कृतम् इति एकं समाधानम्।

अपरं समाधानं भवति यत् पर्यायवचकानां ग्रहणे लघुगुरुचिन्ता नाद्रियते इति नियमेन अत्र पर-पर्यायस्य उदयशब्दस्य ग्रहणे न हानिः इति शम्।

पाठगतप्रश्नाः-१

१. उदात्तादनुदात्तस्य स्वरितः इत्यनेन सूत्रेण कः स्वरो विधीयते?

२. अग्निमीळे इत्यत्र मकारोत्तरस्य ईकारस्य कः स्वरः?

३. ईळे इत्यत्र अनुदात्तं पदमेकवर्जम् इति सूत्रं कथं न प्रवर्तते?

४. उदात्तपरस्य स्वरितपरस्य अनुदात्तस्य स्वरितनिषेधः केन भवति?

५. केषां मते उदात्तपरस्य स्वरितपरस्य अनुदात्तस्य स्वरितो भवति?

६. नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् इत्यस्मिन् सूत्रे उदयशब्दस्य कोऽर्थः?

१.३) एकश्रुति दूरात्संबुद्धौ॥ (१.२.३३)

सूत्रार्थः - दूरात् सम्बोधने वाक्यम् एकश्रुति स्यात्।

सूत्रव्याख्या - षड्विधेषु इदं विधिसूत्रम्। अनेन सूत्रेण वाक्यानाम् एकश्रुतित्वं विधीयते। एकश्रुतौ दूरात् सम्बुद्धौ इति च सूत्रगतपदच्छेदः। अत्र दूरात् इत्यत्र दूरान्तिकार्थेभ्यो द्वितीया च इति सूत्रेण पञ्चमी, सम्बुद्धौ इत्यत्र सप्तम्येकवचनम्। अपि च एकश्रुति इति क्लीबलिङ्गि प्रथमैकवचनान्तं पदं वाक्यम् इति प्रथमैकवचनान्तस्य पदस्य विशेषणम्। अतः तत्र क्लीबलिङ्गे प्रथमैकवचनम्। एवञ्च दूरात् सम्बुद्धौ वाक्यम् एकश्रुति इति अत्र सूत्रगतपदानाम् अन्वयः।

सूत्रे सम्बुद्धौ इति पदेन न हि एकवचनं सम्बुद्धिः इति सूत्रेण निर्दिष्टः पारिभाषिकः सम्बुद्धिशब्दः बोध्यः, अपि तु सम्बुद्धिः इति शब्दः अत्र अन्वर्थः। तथाहि दूरात् इति पञ्चम्यन्तस्य पदस्य अत्र वर्तमानात् सम्बुद्धि- इति शब्दः अत्र अन्वर्थरूपेण ग्राह्यः। एकवचनं सम्बुद्धिः इति सूत्रे निर्दिष्टस्य सम्बुद्धिशब्दस्य सम्बन्धः तु दूरात् इति प्रकृतसूत्रस्थेन पदेन भवितुं नार्हति। अतः सम्बोधयति येन वाक्येन तत्संबोधनम् अर्थात् सम्बुद्धिः इत्येवम् अर्थः अत्र बोद्धव्यः। तादृशस्य च वाक्यस्य प्रकृतसूत्रेण एकश्रुतित्वं विधीयते।

अत्र एकश्रुतिः इति पदे विग्रहः कः ? किम् एकस्य श्रुतिः इति, अथवा एका चासौ श्रुतिः च इति। अस्मिन् प्रश्ने सति उच्यते एकाश्रुतिः इति पदे 'एका चासौ श्रुतिः चेति' इति विग्रहे एकश्रुतिः, एकश्रुतिः अस्ति अस्य वाक्यस्य इति एकश्रुति। अत्र श्रुतिः इति न हि वेदपर्यायः शब्दः। अत्र श्रवणार्थकात् श्रु–धातोः क्तिन्–प्रत्यये ततश्च विभक्तिकार्ये श्रुतिः इति प्रथमैकवचनान्तं पदम्। तस्य च श्रवणम् इत्यर्थः। एका एव श्रुतिः अर्थात् एकश्रवणम् इति तदर्थः। यस्मिन् वाक्ये श्रवणस्य भेदो न वर्तते अर्थात् यत्र अभिन्नश्रुतिः तदेव वाक्यम् एकश्रुति इति उच्यते। अत्र केषाम् अभेदः ? इति जिज्ञासायामुच्यते उदात्तादीनां स्वराणाम् इति। एवञ्च प्रकृतसूत्रेण वाक्यानाम् उदात्तादिस्वराणाम् अभेदः विधीयते। तेनात्र सूत्रार्थः भवति– दूरात् सम्बुद्धौ अर्थात् सम्बोधने वाक्यं एकश्रुति भवति इति।

उदाहरणम् – आगच्छ भो माणवक देवदत्त३।

सूत्रार्थसमन्वयः –अत्र वाक्यम् आग॑च्छ॒ भो॑ माणवक देववत्त इत्येवम् अस्ति। वाक्यमेतद् यदा दूरात् कस्यापि सम्बोधने व्यवह्रियते, तदा प्रकृतसूत्रेण अत्र उदात्तानुदात्तादिस्वरगतभेदस्य अपसारणेन तथा एकस्य एव उदात्तस्वरस्य विधानेन, आगच्छ भो माणवक देवदत्त३ इति एकश्रुत्या अत्र उदात्तस्वरस्यैव समावेशः भवति।

अत्र दूरात् सम्बोधनं भवति चेत् एव प्रकृतसूत्रेण तस्मिन् सम्बोधनबोधके पदे एकश्रुतित्वं विधीयते, अन्यथा एकश्रुतित्वं न भवति। यथा– आग॑च्छ॒ भो॑ माणवक देववत्त इति वाक्येन समीपात् एव यदा आह्वानं विधीयते तदा उदात्तानुदात्तादिस्वराः एव तत्र तिष्ठन्ति।

विशेषः– अत्र दूरं नाम कियद् दूरं स्यात् इति जिज्ञासा स्वाभाविकतया भवति एव। तस्य समाधानम् उच्यते यत् यावति देशे स्वाभाविकप्रयत्नेन उच्चारितं सम्बोध्यमानेन न श्रूयते, तावान् देश एव दूरशब्देन गृह्यते। एवं दूराद्धूते च इत्यादौ सूत्रे अपि बोद्धव्यम्।

९.४) यज्ञकर्मण्यजपन्यूङ्खसामसु॥ (२.१.३४)

सूत्रार्थः - यज्ञक्रियायां मन्त्र एकश्रुतिः स्याज्जपादीन् वर्जयित्वा।

सूत्रव्याख्या - संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन जपादिभिन्नेषु प्रयोगेषु वाक्यानाम् एकश्रुतित्वं विधीयते। यज्ञकर्मणि अजपन्यूङ्खसामसु इति सूत्रगतपदच्छेदः। तत्र यज्ञकर्मणि इति सप्तम्येकवचनान्तं पदम्, अजपन्यूङ्खसामसु इति च सप्तमीबहुवचनान्तं पदम्। एकश्रुति दूरात्सम्बुद्धौ इति सूत्रात् अत्र एकश्रुति इति क्लीबलिङ्गि प्रथमैकवचनान्तं विधेयबोधकं पदम् अनुवर्तते। यज्ञस्य कर्म यज्ञकर्म इति षष्ठीतत्पुरुषसमासः, तस्मिन् यज्ञकर्मणि इति। जपश्च न्यूङ्खश्च साम च जपन्यूङ्खसामानि, न जपन्यूङ्खसामानि अजपन्यूङ्खसामानि, तेषु अजपन्यूङ्खसामसु इति द्वन्द्वगर्भनञ्तत्पुरुषसमासः। एवञ्च अत्र अजपन्यूङ्खसामसु यज्ञकर्मणि एकश्रुति इति सूत्रगतपदयोजना। ततश्च अत्र सूत्रार्थो भवति- यज्ञकर्मणि उदात्तानुदात्तस्वरितस्वराणाम् एकश्रुतिः भवति, जपन्यूङ्खसामानि वर्जयित्वा इति। अनेन सूत्रेण मन्त्रः एकश्रुतिः भवति इति सारः।

जपः अनुकरणमन्त्रः उपांशुप्रयोगो वा, न्यूङ्खाः षोडश ओकाराः, तेन अत्र मन्त्रोच्चारणस्य प्रकारविशेषाः बोद्धव्याः। सामानि वाक्यविशेषस्था गीतयः। तत्र जपे न्यूङ्खेषु सामसु च उदात्तानुदात्तादिस्वरयुक्तानां मन्त्राणाम् उच्चारणम् अस्ति। अत्रोच्यते यदि एतद्भिन्ने यज्ञसम्बन्धिनि कर्मणि मन्त्राणां प्रयोगो भवति, तर्हि तेषां मन्त्राणाम् ऐकश्रुत्यं भवति इति। अर्थात् तेषु यज्ञकर्मसु प्रयुङ्क्तेषु मन्त्रेषु उदात्तानुदात्तादिभेदः न तिष्ठति।

उदाहरणम् - अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वतो३म् (ऋ. ८.४४.१६)।

सूत्रार्थसमन्वयः - उदाहरणरूपेण दत्तः अयं मन्त्रः यज्ञकर्मणि प्रयुङ्क्तः। अतः प्रकृतसूत्रेण अस्मिन् मन्त्रे ऐकश्रुत्यं विधीयते। तेन अत्र उदात्तादिस्वराणां भेदः विलीयते। अतः अत्र उदत्तस्वराणामेव समावेशः दृश्यते।

अत्रेदमवधेयं यत् यदा जपे न्यूङ्खेषु सामसु च मन्त्राणां प्रयोगो भवति, तदा प्रकृतसूत्रेम न इयम् एकश्रुतिः भवति इति। यथा- अत्र उदाहरणरूपेण दत्तस्य मन्त्रस्य यदा संपाठे अर्थात् स्वाध्यायकाले प्रयोगो भवति तदा न ऐकश्रुत्यं विधीयते। एवं जपे प्रयुङ्क्तानां मन्त्राणामपि ऐकश्रुत्यं न भवति। न्यूङ्खाः षोडश ओकाराः, तेषु केचन उदात्ताः केचन अनुदात्ताश्च। अथ तत्रापि प्रकृतसूत्रेण न ऐकश्रुत्यम्। सामासु अपि तथैव न ऐकश्रुत्यम्। तत्रोदाहरणं यथा- ए३ विश्वं समन्त्रिणं दह३ इति।

१.५) उच्चैस्तरां वा वषट्कारः॥ (१.२.३५)

सूत्रार्थः - यज्ञकर्मणि वौषट्- शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन वौषट्- शब्दस्य विकल्पेन उदात्ततरत्वं, एकश्रुतित्वं च विधीयते। उच्चैस्तरां वा वषट्कारः इति त्रीणि पदानि अत्र सन्ति। तत्र उच्चैस्तराम् इति वा इति च द्वे अव्ययपदे, वषट्कारः इति प्रथमैकवचनान्तं पदम्। यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रात् अत्र यज्ञकर्मणि इति सप्तम्येकवचनान्तं पदम्, एकश्रुति दूरात्संबुद्धौ इति सूत्रात् च एकश्रुति इति प्रथमैकवचनान्तं पदमत्र अनुवर्तते। उच्चैस्तराम् इत्यस्य उदात्ततरः इत्यर्थः। स्वरितस्वरात् यदि अनुदात्तस्वरः भवति तदा स्वरितस्वरस्य अर्धभागः उदात्ततरस्वरविशिष्टः भवति। वषट्कार- इति शब्देन अत्र वौषट् इति अव्ययं ग्राह्यम्। एवञ्च अत्र यज्ञकर्मणि वषट्कारः उच्चैस्तराम् एकश्रुतिः वा इति सूत्रगतपदान्वयः भवति। ततश्च अत्र सूत्रार्थः भवति- यज्ञकर्मणि वषट्कारः अर्थात् वौषट्- शब्दः एकश्रुतिः उदात्ततरो वा भवतीति।

अत्र वषट्कारः इत्यत्र कारशब्दस्य कथं ग्रहणं कृतम् इति विषये बहूनि मतानि सन्ति। अत्र कारशब्देन वौषट् इति अव्ययस्य ग्रहणं क्रियते इति केषाञ्चन मतम्। वौषट्- शब्दात् इतरेषामपि शब्दानां यथा विकल्पेन उदात्ततरत्वम् एकश्रुतित्वञ्च यथा स्यात् तदर्थं कारशब्दस्य ग्रहणम् इति च केषाञ्चन मतम्। एतेषाञ्च मतानुसारम् 'अस्तु श्रौषट्' इत्यत्रापि श्रौषट्– शब्दः उदात्ततरस्वरविशिष्टः भवति। अपरेषां च मतेन अत्र कारग्रहणम् अवर्णादपि कारप्रत्ययो भवति इत्यस्य ज्ञापकम्, एतेषां मतानुसारम्

एवकारः इत्यादीनि पदानि सिद्ध्यन्ति। अन्येषां च मतेन पाणिनेः सूत्रं विचित्रं भवति इति ज्ञापनार्थम् अत्र कारशब्दस्य ग्रहणं कृतम्। अस्मादेव कारणात् पाणिनीयसूत्रेषु क्वचित् अक्षरलाघवं प्रधानं भवति क्वचिच्च ज्ञानलाघवं प्रधानं भवति। अत्र वषट्कारश्च वौषट् इति शब्दे निरूढः इति अत्र प्राधान्येन ज्ञातव्यम्।

उदाहरणम् –सोमस्याग्ने वीहि वौ३षट्। सोमस्याग्ने वीहि३ वौ३षट् (ऐतरेय. ३.५.४.६)।

सूत्रार्थसमन्वयः –उदाहरणरूपेण प्रदत्तः अयं मन्त्रः यज्ञकर्मणि प्रयुङ्क्तः। अतः तत्र वर्तमानः वौषट्–शब्दः विकल्पेन उदात्ततरः भवति, तदभावपक्षे च एकश्रुतिः भवति।

विशेषः –स्वरितस्वरात् यदि अनुदात्तस्वरः भवति तदा स्वरितस्वरस्य अर्धभागः उदात्ततरस्वरविशिष्टः भवति इति तु ज्ञातम्, परन्तु अत्र विधीयमानस्य उदात्ततरस्वरस्य किं तावत् स्वरूपम् इति जिज्ञासायाम् उच्यते– उच्चैः इत्यनेन उदात्तः गृह्यते, अयम् उदात्तः अयम् उदात्तः, अयम् अनयोः अतितराम् उदात्तः इति उच्चैस्तराम् अर्थात् उदात्ततरः। तथाहि उदात्तः स्वरः यस्मिन् स्थले उच्चार्यते, ततः अपि उच्चतरे स्थले यदा कोऽपि स्वरः उच्चार्यते, तदा स स्वरः उदात्ततरः इति कथ्यते। एवञ्च तादृशम् उदात्ततरत्वम् एव अत्र प्रकृतसूत्रेण विकल्पे विधीयते।

१.६) विभाषा छन्दसि॥ (१।२।३६)

सूत्रार्थः - छन्दसि विभाषा एकश्रुतिः स्यात्।

सूत्रव्याख्या - संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारात्मकेषु षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन छन्दसि अर्थात् वेदे विकल्पेन ऐकश्रुत्यं विधीयते। अस्मिन् सूत्रे विभाषा छन्दसि इति द्वे पदे स्तः। तत्र विभाषा इति अव्ययपदम्, छन्दसि इति च सप्तम्येकवचनान्तं पदम्। एकश्रुति दूरात्संबुद्धौ इति सूत्रात् अत्र एकश्रुति इति प्रथमैकवचनान्तं पदम् अनुवर्तते। छन्दसि इत्यत्र विषयसप्तमी वर्तते, अतः छन्दसि विषये इत्यर्थः लभ्यते। अत्र पदयोजना - छन्दसि एकश्रुतिः विभाषा इति। ततश्च सूत्रार्थः एवं भवति - छन्दसि विषये उदात्तानुदात्तस्वरितस्वराणाम् एकश्रुतिः विकल्पेन भवति इति। छन्दसि मन्त्राणाम् उदात्तानुदात्तस्वरितस्वराणां विकल्पेन एकश्रुतिः भवति इति निष्कर्षः। अत्र एकश्रुतिः इति न विशेषणपदम्, अपि तु विशेष्यपदमेव। अतः उदात्तानुदात्तस्वरितस्वराणाम् एका अभिन्ना श्रुतिः भवति इति अर्थः अत्र बोद्धव्यः।

अत्रेदमवधेयं यत् यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रेण जपभिन्नेषु न्यूङ्खभिन्नेषु सामभिन्नेषु यज्ञकर्मसु ऐकश्रुत्यस्य विधानसम्भवात् प्रकृतसूत्रस्य प्रयोगस्थलेषु छन्दस्सु अपि ऐकश्रुत्यं सम्भवति, परन्तु अत्र ऐकश्रुत्यं विकल्पेन इष्टम् अस्ति अतः सूत्रे विभाषा इति पदं प्रदत्तम्। अपि च अत्र सूत्रे वा इति पदस्य निवेशेनैव कार्यसम्भवे सति, विभाषा इति पदस्य ग्रहणं यज्ञकर्मणि इति पदस्य निवृत्त्यर्थम्। तथाहि यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रेण जपभिन्नेषु न्यूङ्खभिन्नेषु सामभिन्नेषु यज्ञकर्मसु एव नित्यम् ऐकश्रुत्यं विधीयते, अतः जपभिन्नेषु न्यूङ्खभिन्नेषु सामभिन्नेषु यज्ञकर्मभिन्नेषु च स्थलेषु छन्दस्सु अपि विकल्पेन

ऐकश्रुत्यं यथा स्यात् तदर्थं नूतनमिदं सूत्रं प्रणीतम्। तेन प्रकृतेन सूत्रेण यज्ञकर्मभिन्ने स्वाध्यायकालेऽपि छन्दस्सु विकल्पेन ऐकश्रुत्यं भवति।

उदाहरणम् - 'इ॒षे त्वो॒र्जे त्वा॑। इषे त्वोर्जे त्वा' (वाज. सं. १.१.१)। 'अग्न॒ आया॑ हि वी॒तये॑। अग्न आया हि वीतये' (ऋ. ६.१६.१०)

सूत्रार्थसमन्वयः - ' इ॒षे त्वो॒र्जे त्वा॑। अग्न॒ आया॑ हि वी॒तये॑ ' इति द्वयोः मन्त्रयोः प्रयोगः छन्दसि दृश्यते। अतः प्रकृतसूत्रेण मन्त्रद्वये अस्मिन् उदात्तानुदात्तस्वरितस्वराणां विकल्पेन ऐकश्रुत्यं भवति। तथा सति अनयोः मन्त्रयोः सर्वत्रैव एकस्यैव उदात्तस्वरस्य विधाने 'इषे त्वोर्जे त्वा। अग्न आया हि वीतये' इति वैकल्पिकं प्रयोगद्वयं सिध्यति।

विशेषः - अत्र विभाषा इति पदस्य ग्रहणेन यज्ञकर्मणि इत्यस्य निवृत्तौ अपि, पृथक्तया छन्दसि इति पदस्य ग्रहणात् छन्दोरूपेषु यज्ञकर्मसु विकल्पेन ऐकश्रुत्यं प्राप्नोति एव, परन्तु नैष दोषः, तस्मिन् यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रे यज्ञकर्मणीत्यत्र कर्मशब्दग्रहणात् यज्ञकर्मसु छन्दस्सु तेनैव सूत्रेण नित्यमेव ऐकश्रुत्यं स्यात्, न हि प्रकृतसूत्रेण वैकल्पिकम् ऐकश्रुत्यम्। प्रकृतसूत्रस्यास्य वैकल्पिकत्वात् यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रेण तत्र निषिद्धेषु जपे, न्यूङ्खेषु सामसु च प्रकृतसूत्रेण विकल्पे ऐकश्रुत्यं प्राप्नोति। परन्तु तेषां जपादिपदानाम् अत्र ग्रहणाभावात् छन्दसि इति पदस्य एव च उल्लेखात् न तेषु जपादिषु प्रकृतसूत्रेण वैकल्पिकम् ऐकश्रुत्यम्।

पाठगतप्रश्नाः -२

७. वाक्यं कदा एकश्रुति भवति ?

८. का सम्बुद्धिः ?

९. को जपः ?

१०. के न्यूङ्खाः ?

११. वषट् - कारेण कः शब्दः गृह्यते ?

१२. उच्चैस्तराम् इत्यस्य कोऽर्थः ?

१३. विकल्पेन एकश्रुतिः कुत्र भवति ?

९.७) न सुब्रह्मण्यायां स्वरितस्य तूदात्तः॥ (१.२.३७)

सूत्रार्थः - सुब्रह्मण्याख्ये निगदे ' यज्ञकर्मणि ' इति ' विभाषा छन्दसि ' इति च प्राप्ता एकश्रुतिर्न स्यात् स्वरितस्योदात्तश्च स्यात्।

सूत्रव्याख्या – षड्विधेषु पाणिनीयसूत्रेषु इदं निषेधसूत्रम्, विधिसूत्रमपि। अनेन ऐकश्रुत्यस्य निषेधः भवति, स्वरितस्य स्थाने उदात्तश्च भवति। न सुब्रह्मण्यायां स्वरितस्य तु उदात्तः इति सूत्रगतपदच्छेदः। तत्र न इति तु इति च अव्ययपदम्, सुब्रह्मण्यायाम् इति सप्तम्येकवचनान्तं पदम्, स्वरितस्य इति षष्ठ्येकवचनान्तं पदम्, उदात्तः इति च प्रथमैकवचनान्तं पदम्। एकश्रुति दूरात्संबुद्धौ इति सूत्रात् अत्र एकश्रुति इति प्रथमैकवचनान्तं पदम् अनुवर्तते। अत्रापि एकश्रुतिः इति न विशेषणपदम्, अपि तु विशेष्यपदमेव। अतः उदात्तानुदात्तस्वरितस्वराणाम् एका अभिन्ना श्रुतिः इति तदर्थः। अत्र सुब्रह्मण्यायाम् एकश्रुतिः न, स्वरितस्य तु उदात्तः इति सूत्रगतपदयोजना। सुब्रह्मण्या इति नामविशेषः। तेन च सुब्रह्मण्याख्यो निगदो बोद्धव्यः। अथ कोऽयं निगदः ? इति जिज्ञासायाम् उच्यते निगदशब्दे वर्तमानः गद – धातुः अपादबन्धार्थकः, निपूर्वकात् गद् – धातोः नितरां गद्यते इत्यर्थे कर्मणि ' नौ गदनदपठस्वनः ' इति सूत्रेण अप् – प्रत्ययः। ततश्च प्रक्रियाकार्ये निगदः इति रूपं सिद्धम्, अत्र निशब्दः प्रकर्षे अर्थे वर्तते। उच्चैरपादबन्धं यजुरात्मकं यत् मन्त्रवाक्यं पठ्यते स भवति निगदः। तस्मिन् निगदे न पादव्यवस्था, नापि अर्द्धर्चव्यवस्था। एवमत्र सूत्रार्थो भवति – सुब्रह्मण्याख्ये निगदे ऐकश्रुत्यं न स्यात् लक्षणेन प्राप्तस्य स्वरितस्य उदात्तश्च भवति इति।

उदाहरणम् – ' सुब्रह्मण्यो३म् इन्द्रागच्छ, हरिव आगच्छ, मेधातिथेर्मेष वृषणश्वस्य मेने गौरावस्कन्दिन्नहल्यायै जार कौशिकब्राह्मण गौतमब्रुवाण श्वः सु त्यागमागच्छ मघवन् ' (शत. ब्रा. ३.३.११९)।

सूत्रार्थसमन्वयः – अत्र उदाहरणमन्त्रस्य यज्ञकर्मणि विहितत्वात् छन्दस्त्वात् च ' यज्ञकर्मणि ' इति ' विभाषा छन्दसि ' इति च सूत्राभ्यां प्राप्ता एकश्रुतिः प्रकृतसूत्रेण निषिध्यते। सुब्रह्मण्यो३म् इत्यत्र च स्वरितस्य उदात्तत्वं विधीयते। तथाहि यत्प्रत्ययान्तस्य सुब्रह्मण्यशब्दस्य स्त्रीत्वविवक्षायां ततः अजाद्यतष्टाप् इति सूत्रेण टापि टापः टकारस्य चुटू इति सूत्रेण टकारस्य हलन्त्यम् इति सूत्रेण पकारस्य च इत्संज्ञायां तस्य लोपः इत्यनेन च तयोः इत्संज्ञकयोः लोपे ततश्च विभक्तिकार्ये सुब्रह्मण्या इति रूपम्। सुब्रह्मण्यशब्दस्य यत्प्रत्ययान्तत्वात् तस्य च यत्प्रत्ययस्य तित्त्वात् तित् स्वरितम् इति सूत्रेण अत्र अन्त्यस्य अकारस्य स्वरितस्वरः भवति। टापः आकारस्य सुब्रह्मण्यशब्दस्य च अकारस्य स्थाने विहितः आकारः स्थानेऽन्तरतमः इति सूत्रेण आन्तरतम्यात् स्वरितः एव भवति। अत्र टाप्प्रत्ययस्य पित्त्वात् अनुदात्तौ सुप्पितौ इति सूत्रेण आकारस्य अनुदात्तस्वरविशिष्टत्वेऽपि तयोः स्वरितानुदात्तयोः स्थाने स्वरितः एव भवति, स्वरितानुदात्तसन्निपाते स्वरितम् इति सूत्रेण स्वरितस्य अनुदात्तस्य च स्थाने स्वरितस्य एव निर्देशात्। अतः परं सुब्रह्मण्या + ओम् इत्यवस्थायाम् ओमाङोश्च इति पररूपे ओकारे जातस्य सुब्रह्मण्योम् इति शब्दस्य निपातान्तत्वात् तस्य च निपातस्य निपाता आद्युदात्ताः इति सूत्रेण आद्युदात्तत्वात् तत्र च आकारस्य ओकारस्य स्थाने विहितस्य ओकारस्य स्वरितस्वरः भवति। एवं सुब्रह्मण्योम् इत्यत्र अन्तिमः ओकारः स्वरितः इति सिद्धम्। ततश्च प्रकृतसूत्रेण ओकारस्य लक्षणेन प्राप्तस्य स्वरितस्वरस्य स्थाने उदात्तस्वरः विधीयते।

विशेषः – अत्र सुब्रह्मण्या + ओम् इत्यवस्थायां स्वरितस्य उदात्तस्य च स्थाने एकादेश उदात्तेनोदात्तः इति सूत्रेण एकादेशे उदात्तस्वरः न भवति, तस्मिन् सूत्रे अनुदात्तस्य च यत्रोदात्तलोपः इति सूत्रात् अनुदात्तस्य इति पदस्य अनुवर्तनात् तेन सूत्रेण उदात्तस्य अनुदात्तस्यैव च स्थाने उदात्तः एकादेशः भवति।

१.७.१) असावित्यन्तः॥ (वा. ६५१)

वार्तिकार्थः – तस्मिन्नेव निगदे प्रथमान्तस्य अन्त उदात्तः स्यात्।

वार्तिकव्याख्या – इदं वार्तिकं न सुब्रह्मण्यायां स्वरितस्य तूदात्तः इति सूत्रे पठितम्। अनेन उदात्तस्वरः विधीयते। असौ इति अन्तः इति वार्तिकगदपदच्छेदः। तत्र असौ इति प्रथमैकवचनान्तं पदम्, इति इत्यव्ययम्, अन्तः इति च प्रथमैकवचनान्तं पदम्। 'सुब्रह्मण्योम् सुब्रह्मण्योम् सुब्रह्मण्योम् इन्द्रागच्छ हरिव आगच्छ ...... वासुदेवस्य पुत्रः पशुपतेः पौत्रो नारायणस्य नप्ता रामभद्रस्य पिता महेन्द्रस्य पौत्रः कमलाकस्य प्रपौत्रो देवदत्तो यजते सुत्याम्' – निगदे एवं विधानेन ज्ञायते यत् मन्त्रे यजमानस्य नाम प्रथमान्ततया प्रयोक्तव्यम्, तस्य पूर्वपुरूषाणां नामानि च षष्ठ्यन्ततया प्रयोक्तव्यानि इति। अत्र वार्तिके असौ इति पदेन तदेव यजमानस्य प्रथमान्तं नामवाचकं पदं ग्राह्यम्। अथ अनेन वार्तिकेन तस्य यजमाननामवाचकस्य प्रथमान्तस्य पदस्य अन्तस्य उदात्तस्वरः विधीयते।

उदाहरणम् – गार्ग्यो यजते।

वार्तकार्थसमन्वयः – गार्ग्यः इत्यत्र गर्गादिभ्यो यञ् इति सूत्रेण यञ्प्रत्ययो विधीयते। तस्य च यञ्प्रत्ययस्य ञिदित्त्वात् गार्ग्यशब्दस्य ञ्नित्यादिर्नित्यम् इति सूत्रेण आद्युदात्तत्वे प्राप्ते प्रकृतवार्तिकेन अत्र अन्तस्य उदात्तस्वरः विधीयते।

१.७.२) अमुष्येत्यन्तः॥ (वा. ६५२)

वार्तिकार्थः – षष्ठ्यन्तस्यापि अन्त उदात्तः स्यात्।

वार्तिकव्याख्या – इदं वार्तिकं न सुब्रह्मण्यायां स्वरितस्य तूदात्तः इति सूत्रे पठितम्। अनेन उदात्तस्वरः विधीयते। अत्र अमुष्य इति अन्तः इति वार्तिकगतपदच्छेदः। अत्र अमुष्य इति षष्ठ्येकवचनान्तं पदम्, इति इत्यव्ययम्, अन्तः इति च प्रथमैकवचनान्तं पदम्। अत्रापि 'वासुदेवस्य पुत्रः पशुपतेः पौत्रो नारायणस्य नप्ता रामभद्रस्य पिता महेन्द्रस्य पौत्रः कमलाकस्य प्रपौत्रो देवदत्तो यजते सुत्याम्' – इत्यवंरूपेण मन्त्रे षष्ठ्यन्ततया विहितस्य पदस्य अमुष्य इति पदेन ग्रहणम्। अतः अनेन वार्तिकेन तस्य षष्ठ्यन्ततया विहितस्य पदस्य अन्तस्य उदात्तस्वरः विधीयते।

इदमत्र अवधेयं यत् स्यान्तं विना अन्यानि षष्ठ्यन्तानि पदानि अत्र विवक्षितानि। अत्र स्यान्तषष्ठ्यन्तस्य व्यवच्छेदः भवति, स्यान्तस्योपोत्तमं च इति वार्तिके स्यान्तस्य इति पदग्रहणात्।

उदाहरणम् – दाक्षेः पिता यजते।

सूत्रार्थसमन्वयः – दाक्षेः इति दाक्षि – शब्दस्य षष्ठ्येकवचने रूपम्। दक्षशब्दात् अत इञ् इति सूत्रेण इञ्प्रत्यये इञ्प्रत्ययस्य ञकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण तस्य ञकारस्य लोपे ततश्च प्रक्रियाकार्ये दाक्षेः इति रूपं सिध्यति। अत्र इञ्प्रत्ययस्य ञिदित्त्वात् ञ्नित्यादिर्नित्यम् इति सूत्रेण आद्युदात्तत्वे प्राप्ते प्रकृतवार्तिकेन अत्र अन्तस्य उदात्तस्वरः विधीयते।

१.७.३) स्यान्तस्योपोत्तमं च॥ (वा. ६५३)

वार्तिकार्थः – स्यान्तस्य उपोत्तमस्य अन्त्यस्य च उदात्तस्वरः स्यात्।

वार्तिकव्याख्या – इदं वार्तिकं न सुब्रह्मण्यायां स्वरितस्य तूदात्तः इति सूत्रे पठितम्। अनेन उदात्तस्वरः विधीयते। स्यान्तस्य उपोत्तमं च इति वार्तिकगतपदच्छेदः। तत्र स्यान्तस्य इति षष्ठ्येकवचनान्तं पदम्, उपोत्तमम् इति प्रथमैकवचनान्तं पदम्, च इति अव्ययपदम्। अत्र स्यान्तपदेन निगदे षष्ठ्यन्ततया प्रयुज्यमानानि स्यान्तानि पदानि ग्राह्याणि। एवञ्च प्रकृतवार्तिकेन तस्यैव पदस्य उपोत्तमस्य अर्थात् अन्त्यात् पूर्वस्य अन्त्यस्य च उदात्तस्वरः विधीयते। अत्र चकारेण अन्तः इति पदम् अनुवर्तते। तेन प्रकृतवार्तिकेन स्यान्तस्य पदस्य अन्त्यस्य अन्त्यात् पूर्वस्य च उदात्तस्वरः विधीयते।

उदाहरणम् – गार्ग्यस्य पिता यजते।

वार्तिकार्थसमन्वयः – गार्ग्यस्य इत्यत्र गार्ग्यस्य इति स्यान्तं पदम्, तस्मात् अत्र ग्य – इति उपोत्तमस्य अकारस्य स्य – इत्यत्र अकारस्य च प्रकृतवार्तिकेन उदात्तस्वरः विधीयते।

१.७.४) वा नामधेयस्य॥ (वा. ६५४)

वार्तिकार्थः – स्यान्तस्य नामधेयस्य उपोत्तममुदात्तं वा स्यात्।

वार्तिकव्याख्या – इदमपि वार्तिकं न सुब्रह्मण्यायां स्वरितस्य तूदात्तः इति सूत्रे पठितम्। अनेन वैकल्पिकः उदात्तस्वरः विधीयते। द्विपदात्मकमिदं वार्तिकम्। अत्र वा इति अव्ययपदम्, नामधेयस्य इति च षष्ठ्येकवचनान्तं पदम्। स्यान्तस्योपोत्तमं च इति वार्तिकात् अत्र स्यान्तस्य इति षष्ठ्येकवचनान्तं पदम्, उपोत्तमम् इति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। स्यान्तस्य इति नामधेयस्य इति पदस्य विशेषणम्। अत्र नामधेयस्य इति पदेन निगदे षष्ठ्यन्ततया प्रयुज्यमानानि नामवाचकानि स्यान्तानि पदानि ग्राह्यन्ते। अतः प्रकृतवार्तिकेन तस्य नामवाचकस्य स्यान्तस्य पदस्य उपोत्तमस्य अर्थात् अन्त्यात् पूर्वस्य उदात्तस्वरः विधीयते। अत्र वा इति पदग्रहणात् स उदात्तस्वरः विकल्पेन भवति। अनेन वार्तिकेन यस्मिन् पक्षे उपोत्तमस्य उदात्तस्वराभावः तस्मिन् पक्षे स्यान्तस्य अन्तस्य उदात्तस्वरः भवति। अयमपि अन्तस्थानीयः उदात्तस्वरः अनेनैव वार्तिकेन भवति।

उदाहरणम् – देवदत्तस्य पिता यजते।

वार्तिकार्थसमन्वयः – देवदत्तस्य इति नामवाचकं पदम्, किञ्च अत्र पदमिदं स्यान्तम्। अतः प्रकृतवार्तिकेन अत्र नामवाचकस्य देवदत्तस्य इति पदस्य उपोत्तमस्य अर्थात् अन्त्यात् पूर्वस्य विकल्पेन उदात्तस्वरः भवति। तदभावपक्षे च अन्तस्य स्य – इति अकारस्य उदात्तस्वरः भवति।

पाठगतप्रश्नाः-३

१४. विभाषा छन्दसि इति सूत्रे विभाषा इति पदग्रहणं कथम् ?

१५. को निगदः ?

१६. निगदे यजमानस्य नामवाचके प्रातिपदिके का विभक्तिः भवति ?

१७. अमुष्येत्यन्तः इति वार्तिकेन कथं स्यान्तस्य षष्ठ्यन्तपदस्य न अन्तोदात्तत्वम् ?

१८. उपोत्तमं नाम कः ?

९.८) देवब्रह्मणोरनुदात्तः॥ (१.२.३८)

सूत्रार्थः-देवब्रह्मणोः स्वरितस्य अनुदात्तः स्यात् सुब्रह्मण्यायाम्।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु एतद् विधिसूत्रम्। सूत्रेऽस्मिन् द्वे पदे वर्तेते। देवब्रह्मणोः अनुदात्तः इति सूत्रगतपदच्छेदः। तत्र देवब्रह्मणोः इति सप्तमीद्विवचनान्तं पदम्। अनुदात्तः इति च प्रथमैकवचनान्तं पदम्। पूर्वस्मात् 'न सुब्रह्मण्यायां स्वरितस्य तूदात्तः' इति सूत्रात् स्वरितस्य इति षष्ठ्यन्तं तथा सुब्रह्मण्यायाम् इति सप्तम्यन्तं पदं च अत्र अनुवर्तेते। सुब्रह्मण्यायां देवब्रह्मणोः स्वरितस्य अनुदात्तः इति पदयोजना। देवब्रह्मणोः इत्यत्र देवश्च ब्रह्मा च इत्यनयोः द्वन्द्वसमासे देवब्रह्माणौ, तयोः देवब्रह्मणोः। अस्य देवशब्दे ब्रह्मण्–शब्दे च परे इत्यर्थः। अनुदात्तः इति प्रथमान्तं विधीयमानं पदम्। सुब्रह्मण्यायाम् इत्यस्य सुब्रह्मण्यनामके यजुर्वेदस्य मन्त्रविशेषे इत्यर्थः। एवञ्च सूत्रार्थो भवति– सुब्रह्मण्यनामके यजुर्वेदस्य मन्त्रविशेषे देवब्रह्मणोः शब्दयोः स्वरितस्य अनुदात्तस्वरः भवति। न सुब्रह्मण्यायां स्वरितस्य तूदात्तः इति सूत्रेण उदात्ते प्राप्ते प्रकृतसूत्रेण तस्य अनुदात्तस्वरः इति बोध्यम्।

उदाहरणम्- देवा ब्रह्माण आगच्छत इति।

सूत्रार्थसमन्वयः - अस्मिन् सुब्रह्मण्यनामके यजुर्वेदस्य मन्त्रविशेषे देवशब्दः तथा ब्रह्मण्-शब्दः प्रयुक्तः अस्ति। अतः देवा ब्रह्माण आगच्छत इत्यस्मिन् उदाहरणे देवा इत्यत्र वकारोत्तरस्य आकारस्य तथा ब्रह्माण इत्यत्र ह्मोत्तरस्य आकारस्य 'न सुब्रह्मण्यायां स्वरितस्य तूदात्तः' इत्यनेन उदात्ते प्राप्ते अनेन प्रकृतसूत्रेण तयोः अनुदात्तस्वरः विधीयते।

९.९) स्वरितात्संहितायामनुदात्तानाम्॥ (१.२.३९)

सूत्रार्थः-स्वरितात् परेषाम् अनुदात्तानां संहितायामेकश्रुतिः स्यात्।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं तावद् विधिसूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र स्वरिताद् इति पञ्चम्येकवचनान्तं, संहितायामिति सप्तम्येकवचनान्तं तथा अनुदात्तानामिति षष्ठीबहुवचनान्तं पदम्। एकश्रुति दूरात्सम्बुद्धौ इति सूत्रादिह एकश्रुतिः इति एकवचनान्तं पदमनुवर्तते। स्वरिताद् इति पञ्चम्यन्तं पदम्, अतः तस्मादित्युत्तरस्य इति परिभाषया स्वरितात् परस्य इत्यर्थो बोध्यः। एकश्रुतिः इति प्रथमान्तं पदम्, अतः तद् विधायकपदम्। अनुदात्तानाम् इत्यत्र जातौ बहुवचनम्। तेन एकस्य द्वयोः बहूनां च विधिः बोध्यः। अतः अनुदात्तानाम् इत्यस्य अर्थः अनुदात्तस्य अनुदात्तयोः अनुदात्तानां वा इति। संहितायाम् इत्यत्र विषयसप्तमी वर्तते। एका श्रुतिः यस्य तत् एकश्रुति इति बहुव्रीहिः। श्रवणं श्रुतिः। दूरादाह्वाने सति, उदात्त-अनुदात्त-स्वरितस्वराणाम् एकश्रुतिः भवति। यत्र उदात्तानुदात्तस्वरितानां पृथक् कोऽपि स्वरः न श्रूयते सः एकश्रुतिस्वरः। संहितायां स्वरिताद् अनुदात्तानाम् एकश्रुतिः स्यादिति सूत्रगतपदानाम् अन्वयः। साकल्येन सूत्रस्य अर्थो भवति- संहितायां सत्यां स्वरितस्वरात् परं विद्यमानानाम् अनुदात्तस्वराणां एकश्रुतिः भवति अर्थात् कोऽपि विशिष्टः स्वरः न श्रूयते इति भावः।

उदाहरणम्- इमं मे गङ्गे यमुने सरस्वति।

सूत्रार्थसमन्वयः- अस्मिन् उदाहरणे मे इति शब्दे स्वरितस्वरः वर्तते। तस्मात् परं वर्तते गङ्गे-यमुने इत्यादयः शब्दाः। एते च अनुदात्ताः सन्ति। स्वरितस्वरात् परं विद्यमानत्वात् अनुदात्तानां तेषां गङ्गे यमुने इत्यादीनां शब्दानाम् एकश्रुतिः सिद्धा।

९.१०) उदात्तस्वरितपरस्य सन्नतरः॥ (१.२.४०)

सूत्रार्थः-उदात्तस्वरितौ परौ यस्मात्तस्य अनुदात्तस्य सन्नतरः स्यात्।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं तावद् विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे विद्येते। तत्र उदात्तस्वरितपरस्य इति षष्ठ्येकवचनान्तं, सन्नतरः इति प्रथमैकवचनान्तं, किञ्च अनुदात्तानाम् इति षष्ठीबहुवचनान्तं पदम्। अनुदात्तग्रहणम् अनुवर्तते। उदात्तस्वरितपरस्य इत्यत्र परशब्दः प्रत्येकम् अभिसम्बध्यते। उदात्तः परं यस्मात् स उदात्तपरः, स्वरितः परं यस्मात् स स्वरितपरः। उदात्तपरस्य स्वरितपरस्य च अनुदात्तस्य सन्नतर आदेशो भवति। सन्नशब्दस्य नीचैः इति अर्थः। अतः सन्नतर इत्यस्य अनुदात्ततरः इत्यर्थः। एवञ्च सूत्रार्थो भवति- उदात्तस्वरः स्वरितस्वरश्च यदा परे तिष्ठतः, तदा पूर्वस्य अनुदात्तस्वरस्य सन्नतरः आदेशो भवति।

उदाहरणम्- इमं मे गङ्गे सरस्वति शुतुद्रि व्यचक्षयत्स्वः, माणवक जटिलकाध्यापक क्व गमिष्यसि इति च।

सूत्रार्थसमन्वयः- वेदे सम्बोधनपदम् आमन्त्रितशब्देन उच्यते। अनुदात्तस्वरः च निघातशब्देन उच्यते। अत्र मेशब्दम् आश्रित्य सरस्वति इत्यत्र आमन्त्रितनिघातः। शुतुद्रिशब्दस्य तु पादादित्वात् निघातो न भवति। पादस्य आदौ विद्यमानत्वात्, आमन्त्रितत्वात् च षाष्ठेन आमन्त्रितस्य च इत्यनेन शुतुद्रिशब्दस्य शकारोत्तरः उकारः उदात्तः भवति, अतः तस्मिन् परे सति पूर्वस्य सरस्वतिशब्दस्य इकारस्य अनुदात्तस्य सन्नतरः आदेशो भवति। व्यचक्षयत्स्वः इत्यत्र वि-इति उपसर्गत्वाद् आद्युदात्तः। वि इत्यतः परम् अचक्षयदिति तिङन्तस्य तिङः इत्यनेन निघातः। स्वः इत्यत्र 'न्यङ्स्वरौ स्वरितौ' इत्यनेन स्वरितः अस्ति। तस्मिन् स्वरितस्वरे परे सति प्रोक्तसूत्रेण यकारोत्तरस्य अकारस्य सन्नतरः (अनुदात्ततरः) स्वरः सिद्धः।

द्वितीये उदाहरणे क्व इति शब्दे स्वरितस्वरो विद्यते। अतः तस्मिन् परे सति अध्यापकशब्दस्य ककारोत्तरः अकारः अनुदात्तः, तस्य अनेन सूत्रेण सन्नतर आदेशो भवति।

९.११) अनुदात्तं च॥ (८.१.३)

सूत्रार्थः-द्विरुक्तस्य परं रूपम् अनुदात्तं स्यात्।।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं तावत् विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे विद्येते। तत्र अनुदात्तम् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययपदम्। पूर्वस्मात् तस्य परमाम्रेडितम् इति सूत्रे आम्रेडितसंज्ञा क्रियते। "सर्वस्य द्वे" इत्यस्मिन् अधिकारे वर्तते इदं सूत्रम्। अस्मिन् अधिकारे उक्तानां शब्दानाम् द्वित्वं भवति। द्वित्वे कृते द्वयोः शब्दयोः मध्ये यः द्वितीयः शब्दः, तस्य 'तस्य परमाम्रेडितम्' इति सूत्रेण आम्रेडितसंज्ञा भवति। आम्रेडितस्य उदाहरणानि भवन्ति चौर चौर, वृषल वृषल, दस्यो दस्यो घातयिष्यामि त्वा, बन्धयिष्यामि त्वा इत्यादि। तस्य आम्रेडितसंज्ञकस्य अनेन सूत्रेण अनुदात्तस्वरः स्यात्। एवञ्च साकल्येन सूत्रार्थो भवति द्विः उक्तयोः शब्दयोः मध्ये यः परः, तस्य अनुदात्तं स्यात् इति।

उदाहरणम्- द्विवेदिवे॑ इति।।

सूत्रार्थसमन्वयः- अस्मिन् उदाहरणे दिवे दिवे इत्यत्र वारद्वयं दिवे-शब्दः प्रयुक्तः अस्ति। अतः द्वितीयस्य दिवे-शब्दस्य अनेन सूत्रेण अनुदात्तस्वरो भवतीति शम्।

विशेषः- प्रकृतिस्वरे प्राप्ते परस्य अनुदात्तत्वम् उच्यते। अनुदात्तशब्दः अत्र न शास्त्रीयम् अनुदात्तम्, तर्हि किमिति चेत् तस्य अत्र अन्वर्थ एव ग्राह्यः। तस्य विग्रहो भवति अविद्यमानम् उदात्तम् अनुदात्तम् इति। शास्त्रीयम् अनुदात्तं यदि विवक्षितं स्यात् तर्हि तत्र सम्बन्धार्था षष्ठी उच्चारणीया इति विशेषः।

पाठगतप्रश्नाः-४

१९. सुब्रह्मण्यायाम् इत्यस्य कः अर्थः।

२०. देवब्रह्मणोरनुदात्तः इति सूत्रस्य कोऽर्थः।

२१. सुब्रह्मण्यायाम् उदात्तस्वरितपरस्य सन्नतरः इति सूत्रे विधीयमानः एकश्रुतिस्वरः कः।

२२. स्वरितात्संहितायामनुदात्तानाम् इति सूत्रस्य कोऽर्थः।

२३. सन्नतरो नाम किम्।

२४. वेदे आमन्त्रितशब्दार्थः कः।

२५. उदात्तस्वरितपरस्य विग्रहं लिखत।

२६. उदात्तस्वरितपरस्य सन्नतरः इति सूत्रस्य अर्थं लिखत।

२७. अनुदात्तं च इति सूत्रस्य अर्थं लिखत।

२८. अनुदात्तं च इति सूत्रे अनुदात्तशब्दार्थः कः।

पाठसारः

उदात्तात्परस्य अनुदात्तस्य स्वरितो भवति परन्तु यदि अनुदात्तस्य परं उदात्तः स्वरितो वा स्यात् तर्हि पूर्वस्य अनुदात्तस्य स्वरितो न भवति। गार्ग्यादीनाम् ऋषीणां मते तु स्वरित एव भवति तस्य निषेधो न भवति। दूरात् सम्बूद्धौ वाक्यस्य एकश्रुतिः विधीयते। अत्र एकश्रुतिविषये विग्रहपुरस्सरम् उदाहरणमपि वर्णितम्। उदात्तानुदात्तस्वरितस्वराणां तिरोधानम् एकश्रुतिः। यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रेण जपभिन्ने न्यूङ्खभिन्ने सामभिन्ने च यज्ञकर्मणि मन्त्रः एकश्रुतिः भवति। जपः अनुकरणमन्त्रः, न्यूङ्खाः नाम षोडश ओकाराः, सामानि च वाक्यविशेषस्था गीतयः। अत्र वषट्कारः इति पदेन वौषट् इति अव्ययपदं गृह्यते। अत्र कारशब्दस्य ग्रहणविषये अन्यानि अपि बहूनि मतानि सन्ति। विभाषा छन्दसि इति सूत्रेण छन्दसि विकल्पेन ऐकश्रुत्यं विधीयते। न सुब्रह्मण्यायां स्वरितस्य तूदात्तः इति सूत्रेण सुब्रह्मण्याख्ये निगदे यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रेण विभाषा छन्दसि इति सूत्रेण च प्राप्ता एकश्रुतिः निषिध्यते, स्वरितस्वरस्य च स्थाने उदात्तस्वरः विधीयते। यस्मिन् मन्त्रवाक्ये पादव्यवस्था न वर्तते तत् निगद इत्युच्यते। सुब्रह्मण्या+ओम् इत्यादिस्थलेषु स्वरितस्वरस्य उदात्तस्वरस्य च स्थाने एकादेश उदात्तेनोदात्तः इति सूत्रेण एकादेशे उदात्तस्वरः न भवति, तस्मिन् सूत्रे अनुदात्तस्य च यत्रोदात्तलोपः इति सूत्रात् अनुदात्तस्य इति पदस्य अनुवर्तनात्, किञ्च तेन एकादेशविधायकेन सूत्रेण उदात्तानुदात्तयोः स्थाने एव एकादेश उदात्तः भवति, न तु उदात्तस्वरितयोः स्थाने। असावित्यन्तः इति वार्तिकेन निगदे प्रथमान्तस्य पदस्य अन्तः उदात्तो भवति। स्यान्तस्योपोत्तमं च इति वार्तिकेन स्यान्तपदस्य अन्तस्य अन्तात् पूर्वस्य च उदात्तस्वरः भवति। वा नामधेयस्य इति सूत्रेण नामवाचकस्य स्यान्तस्य पदस्य अन्तात् पूर्वस्य विकल्पेन उदात्तस्वरः भवति, यस्मिन् पक्षे तत्र अन्तात् पूर्वम् उदात्तः न भवति तत्र

अन्तस्य उदात्तस्वरः भवति। देवब्रह्मणोः शब्दयोः स्वरितस्य अनुदात्तः स्यात्। किञ्च स्वरितात् परस्य अनुदात्तस्य एकश्रुतिः स्यात्। द्विवारं उच्यमाने शब्दे परः आम्रेडितसंज्ञकः शब्दः अनुदात्तो भवति।

पाठान्तप्रश्नाः

१. अग्निमीळे इति रूपं सस्वरं साधयत।
२. नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् इति सूत्रं व्याख्यात।
३. एकश्रुति दूरात्संबुद्धौ इति सूत्रं व्यख्यात।
४. यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रं व्याख्यात।
५. उच्चैस्तरां वा वषट्कारः इति सूत्रं व्यख्यात।
६. विभाषा छन्दसि इति सूत्रं व्याख्यात।
७. न सुब्रह्मण्यायां स्वरितस्य तूदात्तः इति सूत्रस्यैकमुदाहरणं प्रदर्शयत।
८. असावित्यन्तः इति वार्तिकं व्याख्यात।
९. देवब्रह्मणोरनुदात्तः इति सूत्रं व्याख्यात।
१०. उदात्तस्वरितपरस्य सन्नतरः इति सूत्रस्य उदाहरणं समन्वयत।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. स्वरितस्वरः विधीयते।
२. स्वरितस्वरः।
३. उदात्तानुदात्तस्य स्वरितः इत्यस्य असिद्धत्वात् इति।
४. नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् इत्यनेन।
५. गार्ग्य-काश्यप-गालवानाम् ऋषीणां मते।
६. परमित्यर्थः।

उत्तराणि-२

७. दूरात् सम्बोधने वाक्यम् एकश्रुति भवति।
८. सम्बोधयति येन वाक्येन तत् सम्बुद्धिः।
९. अनुकरणमन्त्रः उपांशुप्रयोगो वा जपः।
१०. न्यूङ्खा नाम षोडश ओकाराः।
११. वौषट् - इति शब्दः।
१२. अतितराम् उदात्तः इति।

१३. छन्दसि।

उत्तराणि-३

१४. यज्ञकर्मणि इति पदस्य निवृत्त्यर्थम्।

१५. उच्चैरपादबन्धं यजुरात्मकं यत् मन्त्रवाक्यं पठ्यते तद् भवति निगदः।

१६. प्रथमा विभक्तिः।

१७. स्यान्तस्योपोत्तमं च इति वार्तिके स्यान्तस्य इति पदग्रहणात्।

१८. अन्त्यात् पूर्वः।

उत्तराणि-४

१९. सुब्रह्मण्यनामके यजुर्वेदस्य मन्त्रविशेषे इत्यर्थः

२०. देवब्रह्मणोः स्वरितस्य अनुदात्तः स्यात् इत्यर्थः।

२१. यत्र उदात्तानुदात्तस्वरितानां पृथक् कोऽपि स्वरः न श्रूयते सः एकश्रुतिस्वरः।

२२. स्वरितात् परेषाम् अनुदात्तानां संहितायामेकश्रुतिः स्यात् इत्यर्थः।

२३. अनुदात्ततरः इति।

२४. सम्बोधनपदम् इति।

२५. उदात्तः परो यस्मात् स उदात्तपरः, स्वरितः परो यस्मात् स स्वरितपरः

२६. उदात्तस्वरितौ परौ यस्मात्तस्य अनुदात्तस्य सन्नतरः स्यात्।

२७. द्विरुक्तस्य परं रूपम् अनुदात्तं स्यात्।।

२८. अविद्यमानम् उदात्तम् अनुदात्तम् इति।

।।इति नवमः पाठः।।